वह्निसंज्ञकः, पुं, ( वह्नेः संज्ञा संज्ञा यस्य । ततः कन् । ) चित्रकः । इत्यमरः ॥

वह्निसखः, पुं, (वह्नेर्जठराग्नेः सखा। टच् समासे ।) जीरकः । इति राजनिर्घण्टः । ( वह्नेः सखा ।) वायुः । इति वह्निमित्रशब्ददर्शनात् ॥

वह्यं, क्ली, ( वहतीति । वह+"अघ्न्यादयश्च ।" उणा० ४ । ११२ । इति यक् प्रत्ययेन साधुः ।) वाहनम् । इति हेमचन्द्रः ॥ ( वहन्त्यनेनेति । वह+"वह्यं करणम् ।" ३ । १ । १०२ । इति यत् । ) शकटम् । इत्युणादिकोषः ॥ ( यथा, अथर्ववेदे । ४ । २० । ३ ।

"सा भूमिमा रुरोहिथ वह्यं श्रान्ता वधू-
रिव ॥" )

वह्या, स्त्री, मुनिपत्नी । इत्युणादिकोषः ॥

वा, क सुखाभिगतिसेवासु । इति कविकल्पद्रुमः ॥ ( चुरा०-पर०-सुखाप्तौ अक०-अन्यत्र सक०-सेट् । ) क, वापयति । इति दुर्गादासः ॥

वा, ल गमनहिंसयोः । इति कविकल्पद्रुमः ॥ ( अदा०-पर०-सक०-सेट् । ) ओष्ठ्यादिरप्ययमित्येके । गमनमिह वायुकर्त्तृकमेव । ल, वाति वायुः । हिंसनं सूचनमिति चतुर्भुजः । इति दुर्गादासः ॥

वा, व्य, (वा+क्विप् ।) विकल्पः । (यथा, मनुः । २ । ११२ ।

"धर्म्मार्थौ यत्र न स्यातां शुश्रूषा वापि तद्विधा ।
तत्र विद्या न वप्तव्या शुभं बीजमिवोषरे ॥")

उपमा । ( इवार्थे । यथा, रघुः । १६ । ५१ ।

"व्योम पश्चिमकलास्थितेन्दु वा
पङ्कशेषमिव घर्म्मपल्वलम् ॥")

वितर्कः । ( यथा, महाभारते । १ ।१५४।२३।

"किं ते हिड़िम्ब एतैर्वा सुखसुप्तैः प्रबोधितैः ।
मामासादय दुर्ब्बुद्धे तरसा त्वं नराशन ! ॥")

पादपूरणम् । ( यथा, रामायणे । १ । २५ ।३।

"देवासुरगणान् वापि सगन्धर्व्वोरगान् भुवि ।
यैरमित्रान् प्रसह्याजौ वशीकृत्य जयिष्यसि ॥")

समुच्चयः । इति मेदिनी । वे, ७४ ॥ एवार्थः । इति विश्वः ॥ ( यथा, किराते । ३ । १३ ।

"सुता न यूयं किमु तस्य राज्ञः
सुयोधनं वा न गुणैरतीताः ॥" )

वांशः, त्रि, वंशसम्बन्धी । वंशस्यायमित्यर्थे ण(अण्) प्रत्ययेन निष्पन्नः ॥

वांशिकः, पुं, ( वंशीवादनं शिल्पमस्येति । वंश+ठक् । ) वंशीवादकः । इति जटाधरः ॥(भारभूतान् वंशान् हरति वहति आवहति वा । "तद्धरति वहत्यावहति भाराद्वंशादिभ्यः ।" ५ । १ । ५० । इति ठक् । भारभूतवंशहारके तद्वाहके च त्रि ॥ )

वांशी, स्त्री, ( वंशे भवा+वंश+अण् । ङीप् । ) वंशरोचना । इति राजनिर्घण्टः ॥ ( तत्पर्य्यायो यथा,—

"तुगाक्षीरी शुभा वांशी वंशजा वंशलोचना ।"
इति वैद्यकरत्नमाला ॥

"स्याद्वंशरोचना वांशी तुगाक्षीरी तुगा शुभा ।
त्वक्क्षीरी वंशजा शुभ्रा वंशक्षीरी च वैणवी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

वाः [र्], क्ली, (वार्य्यते तृषानेनेति । वृ+णिच्+क्विप् । यद्वा, "वृञ् वरणे । स्वार्थिकोऽण् छान्दसः । तदन्तात् क्विप् । अणि लोपः । हल्ङ्याब्भ्यो लोपः । रेफस्य विसर्जनीयः ।" इति निघण्टौ देवराजयज्वा । १ । १२ । ८ । ) जलम् । इत्यमरः ॥ (यथा, भागवते ।३।१३।१६।

"उज्जहो मे क्षितिर्वार्भिः प्लाव्यमाना रसा-
ङ्गता ॥")

वाःकिटिः, पुं, वारो जलस्य किटिः शूकरः । शिशुमारः । इति केचित् ॥

वाःसदनं, क्ली, ( वारो जलस्य सदनम् । ) जलाधारः । इति त्रिकाण्डशेषः ॥

वाक् [च् ], स्त्री, (उच्यतेऽसौ अनया वेति । वच्+"क्विप् वचिप्रच्छीति ।" उणा० २ । ५७ । इति क्विप् दीर्घोऽसम्प्रसारणञ्च । ) वाक्यम् । ( यथा, मनुः । २ । १५६ ।

"अहिंसयैव भूतानां कार्य्यं श्रेयोऽनुशासनम् ।
वाक् चैव मधुरा श्लक्ष्णा प्रयोज्या धर्म्म-
मिच्छता ॥")

सरस्वती । इत्यमरः ॥ ( यथा, कथासरित्सागरे । १ । ३ ।

"प्रणम्य वाचं निःशेषपदार्थोद्योतदीपिकाम् ।
बृहत्कथायाः सारस्य संग्रहं रचयाम्यहम् ॥")

वाकं, त्रि, ( वकस्येदमिति । वक+"तस्येदम् ।" ४ । ३ । १२० । इत्यण् । ) वकसम्बन्धि । वकस्येदं इत्यर्थे अण्प्रत्ययेन निष्पन्नम् ॥ (क्ली, वकस्य समूहः । "तस्य समूहः ।" ४ । २ । ३७ । इत्यण् । वकसमूहः ॥ उच्यतेऽसौ अनेनेति वा । वच्+घञ् । वाक्यम् । यथा, उत्तररामचरिते । १ । १ ।

"इदं कविभ्यः पूर्व्वेभ्यो नमो वाकं प्रशास्महे ॥"

वेदभागविशेषः । यथा, महाभारते । १२ । ४७ । २५ ।

"यं वाकेष्वनुवाकेषु निषत्सूपनिषत्सु च ।
गृणन्ति सत्यकर्म्माणं सत्यं सत्येषु सामसु ॥"

पुं, वकस्यावयवो विकारो वा । प्राणित्वादञ् । वकावयवविशेषः ॥ )

वाकुची, स्त्री, (वातीति वा वायुस्तं कुचति सङ्कोचयति पूतिगन्धित्वात् । कुच्+कः । गौरादित्वात् ङीष् । ) वृक्षविशेषः । हाकुच इति भाषा ॥ तत्पर्य्यायः । सोमराजी २ सोमवल्ली ३ सुवल्लिका ४ सिता ५ सितावरी ६ चन्द्रलेखा ७ चन्द्री ८ सुप्रभा ९ कुष्ठहन्त्री १० काम्बोजी ११ पूतिगन्धा १२ वल्गुला १३ चन्द्रराजी १४ कालमेषी १५ त्वग्दोषापहा १६ कान्तिदा १७ अवल्गुजा १८ चन्द्रप्रभा १९ । अस्या गुणाः । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । कृमिकुष्ठकफत्वग्दोषविषकण्डूखर्ज्जूनाशित्वञ्च । इति राजनिर्घण्टः ॥ तत्पर्य्यायगुणाः ।

"अवल्गुजो वाकुची स्यात् सोमराजी सुप-
र्णिका ।
शशिलेखा कृष्णफला सोमा पूतिफलीति च ॥
सोमवल्ली कालमेषी कुष्ठघ्नी च प्रकीर्त्तिता ।
वाकुची मधुरा तिक्ता कटुपाका रसायनी ॥
विष्टम्भघ्नी हिमा रुच्या सरा श्लेष्मास्रपित्तनुत् ।
रूक्षा हृद्या श्वासकुष्ठमेहज्वरकृमिप्रणुत् ॥
तत्फलं पित्तलं कुष्ठकफानिलहरं कटु ।
केश्यं त्वच्यं कृमिश्वासकासशोथामपाण्डुहृत् ॥"
इति भावप्रकाशः ॥

वाकुलं, क्ली, ( वकुलस्येदमिति । वकुल+"तस्येदम् ।" ४ । ३ । १२० । इत्यण् ।) वकुलफलम् । अस्य गुणाः ।

"वाकुलं मधुरं ग्राहि दन्तस्थैर्य्यकरं परम् ॥"
इति राजवल्लभः ॥

वाकोरः, पुं, ( वाचि कौतुकवाक्ये कीरः शुक इव प्रियत्वात् । ) श्यालकः । इति शब्दरत्नावली ॥

वाक्छलं, क्ली, ( वाचा छलम् । ) वाक्यव्याजः । यथा । वचनविघातोऽर्थविकल्पोपपत्त्या छलम् । तत्त्रिविधम् । वाक्छलम् । सामान्यच्छलम् । उपचारच्छलञ्च । अविशेषाभिहितेऽर्थे वक्तुरभिप्रायादर्थान्तरकल्पना वाक्छलम् ॥ १ ॥ सम्भवतोऽर्थस्यातिसामान्ययोगात् असम्भूतार्थकल्पना सामान्यच्छलम् ॥ २ ॥ धर्म्मविकल्पनिर्द्देशे अर्थसद्भावनिषेध उपचारच्छलम् ॥ ३ ॥ इति गोतमसूत्रम् ॥ शक्यैकार्थशब्दबोधतात्पर्य्यकशब्दस्य शक्त्या अर्थान्तरतात्पर्य्यकत्वकल्पनया दूषणाभिधानं वाक्छललक्षणम् । यथा । नेपालादागतोऽयं नवकम्बलवत्त्वात् । इत्युक्ते कुतोऽस्य नवसंख्यकाः कम्बलाः ॥१॥ सामान्यविशिष्टसम्भवदर्थाभिप्रायेण उक्तस्य सामान्ययोगादसम्भवदर्थकल्पनया दूषणाभिधानं सामान्यच्छलम् । यथा । ब्राह्मणोऽयं विद्याचरणसम्पन्न इत्युक्ते ब्राह्मणत्वेन विद्याचरणसम्पदं साधयति इति कल्पयित्वा परो वदति कुतो ब्राह्मणत्वेन विद्याचरणसम्पत् व्रात्ये व्यभिचारात् ॥ २ ॥ शक्तिलक्षणयोरेकतरवृत्त्या यः प्रतिषेधः स उपचारच्छलम् । यथा । मञ्चाः क्रोशन्ति इत्यत्र मञ्चस्था एव क्रोशन्ति न तु मञ्चाः । एवं अहं नित्य इति शक्त्या प्रयुक्ते असुकादुत्पन्नस्त्वं कथं नित्य इति प्रतिषेधोऽप्युपचारच्छलम् ॥ ३ ॥ इति तट्टीका ॥ अपि च ।

"सर्व्वेष्वर्थविवादेषु वाक्छले नावसीदति ।
पशुस्त्रीभूम्यृणादाने शास्योऽप्यर्थान्न हीयते ॥"
इति व्यवहारतत्त्वम् ॥

वाक्पतिः, पुं, ( वाचां पतिः । ) वृहस्पतिः ॥ इति शब्दरत्नावली ॥ ( यथा, वृहत्संहितायाम् । ८ । १५ ।

"उदगारोग्यसुभिक्षक्षेमकरो वाक्पतिश्चरन्
भानाम् ॥")

वाक्पतिः, त्रि, ( वाचां पतिरिव पटुत्वात् । ) उद्दामवचनः । इति रायमुकुटः ॥ अनयो-